# Shri Nimbadrilakshminrisimha Stotram

# શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહસ્તોત્રમ્

## Document Information

Text title : Shri Nimbadrilakshminrisimha Stotram

File name : nimbAdrIlakShmInRRisiMhastotram.itx

Category : vishhnu, dashAvatAra, lakShmI, stotra

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહસ્તોત્રમ્

રમણીયરમાસ્તનમણ્ડલસઙ્ગતગન્ધસુગન્ધિત સિંહતનો ।
કરુણારુણદીર્ઘદૃબ્જ હરે વિજયી ભવ નિમ્બાગિરીન્દ્રપતે ॥ ૧॥

હર પઙ્કજજન્મ સુરેન્દ્ર મહાવિબુધાધિપસેવિત દેવમણે ।
નતભક્તમનસ્તિમિરદ્યુમણે પરિપાલય નિમ્બગિરીશ હરે ॥ ૨॥

મતિહીનતયા વનિતાવદનસ્તનલોભકૃતૈસ્મરમોહશરૈઃ ।
વિવશં નૃપશું નરસિંહ વિભો કુરુ માં તવ પાદસરોજવશમ્ ॥ ૩॥

વર નિમ્બગિરીન્દ્ર દરીવિહરત્સુરસિંહ નૃસિંહ દયાજલધે ।
નિગમાન્તનિબોધિત કીર્તિયુતાન્નરસિંહ વિધેર્ન પયં કલયે ॥ ૪॥

નખદંષ્ટ્રસુશોભિત કેસરભૂલ્લલિતોરુ સુફુલ્લમુખાબ્જ હરે ।
નતર ક્ષણદક્ષ વિવાશાન્માં પરિપાલય નિમ્બગિરીન્દ્રપતે ॥ ૫॥

સુરવૈરિવિનાશક કોપવશાત્ કૃતગર્જનનિર્જિત દૈત્યગણમ્ ।
સફલીકૃત સર્વજગત્રિતયં નરસિંહ મહામનસા કલયે ॥ ૬॥

વરદં નતભક્તમનોવશગં કમલાપતિમમ્બુધ નીલતનુમ્ ।
ધનદં ચ દયાકૃતસિંહતનું ન કદાપિ ધુનોમિ હૃદા નૃહરિમ્ ॥ ૭॥

ભુજશાખમભીષ્ટફલપ્રકરં ધનશઙ્ખસુદર્શનપુષ્પધરમ્ ।
કમલાલતિકાવૃતકલ્પતરું નરસિંહં મહામનસા કલયે ॥ ૮॥

હરિં નિમ્બશૈલેશમીશં વિના મે ગતિર્નૈવ ગમ્યં ચ નૈવાસ્તિ લોકે ।
તતસ્તત્પદામ્ભોજયુગ્મં ભજેઽહં શ્રિયં નારસિંહઃ સ્વયં મે દદાતુ ॥ ૯॥

શરદ્યેકવારં હિ નિમ્બાદ્રિનાથં શ્રિયાશ્લિષ્ટરૂપં ગુહામન્દિરસ્થમ્ ।
સુધાસેવતે યઃ સમગ્રાબ્દપુણ્યં દદાત્યૈવ નિમ્બાદ્રિલક્ષ્મીનૃસિંહઃ ॥ ૧૦॥

મહાપરાધયુક્તેન મયા સ્તોત્રં કૃતં હરે ।
ક્ષમસ્વ શાબ્દિકાન્ દોષાન્ નિમ્બશૈલદરીમણે ॥ ૧૧॥

ઇતિ શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

---

*Shri Nimbadrilakshminrisimha Stotram*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*